International Journal of Sanskrit Research 2021; 7(5): 220-223

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 220-223
© 2021 IJSR
www.anantaajournal.com
Received: 25-07-2021
Accepted: 28-08-2021

**डा. टि.उमेशः**
सहाचार्यः, मीमांसाविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः,
आंध्र प्रदेश, भारत

**Corresponding Author:**
**डा. टि.उमेशः**
सहाचार्यः, मीमांसाविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः,
आंध्र प्रदेश, भारत

# पूर्वमीमांसाशास्त्रोक्तदिशा स्मृतिप्रामाण्यविचारः

**डा. टि.उमेशः**

## प्रस्तावना

जैमिनिं सूत्रकारञ्च शाबरं भाष्यकृत्तमम्।
कुमारिलं भट्टपादं प्रणतोऽस्मि प्रभाकरम्।।

कर्मकाण्डात्मकस्य वेदस्य पूर्वभागस्य तात्पर्यार्थनिर्णयार्थं प्रवृत्तं भगवता जैमिनिना प्रतिपादितं द्वादशाध्यायात्मकं पूर्वमीमांसाशास्त्रम्। भगवान् जैमिनिः मीमांसाशास्त्रारम्भे ''अथाऽतो धर्मजिज्ञासा''[1] इत्यनेन धर्मजिज्ञासां प्रतिज्ञाय तत्र च द्वितीये सूत्रे ''चोदना लक्षणोऽर्थो धर्मः''[2] एवं च ''वेदबोधितश्रेय-स्साधनताको धर्मः''[3] इति धर्मलक्षणं प्रतिपादयामास। तस्य धर्मस्य मूलं वेद एव ''वेदो ऽखिलो धर्ममूलं''[4] इति वचनमत्र प्रमाणम्। अपौरुषेयात्मकस्य वेदस्य अनन्तत्वम् व्यापकत्वं वा ''अनन्ता वै वेदाः''[5] इत्यादिना श्रूयते। सर्वासां वेदशाखानाम् अध्ययनं न सुलभसाध्यम्। वेदाध्ययने प्रवृत्ताः अपि सामान्येन स्ववेदशाखामेकाम् अध्ययनं कुर्वन्ति न तैः सर्वाः वेदशाखाः अधीयन्ते। एवं स्थिते व्यापकस्य धर्मस्य अवगतिः दुश्शका भवति। तदर्थं शाखान्तरेषु विहिताः बहवो विषयाः प्राचीनैः मन्त्रदृष्टारैः मन्वादिमहर्षिभिः अर्थतः स्मृत्वा लोकोपकाराय अनेके स्मृतिग्रन्थाः प्रणीताः। मन्वादिप्रणीताः स्मृतिग्रन्थाः श्रुत्युक्तधर्माधर्मादिविचारप्रतिपादकत्वेन प्रामाणिकाः एव सन्ति। तत्र प्रमाणम् –

यः कश्चित्कस्यापि धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे ब्रह्मज्ञानमयो हि सः।।[6] इति

तत्र वेदानां धर्मस्यच यथार्थावगमसाधनत्वेन पुराणान्यायमीमांसाधर्मशास्त्रादिचतुर्दशविद्यास्थानानि प्राचीनैः उपदिष्टानि । यथा -

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
विद्यास्थानानि वेदानां धर्मस्य च चतुर्दश।।[7] इति

अत्र सर्वाण्यपि विद्यास्थानानि श्रुत्यर्थप्रतिपादकान्येव। अतः वेदप्रतिपादितधर्माचरणे एतेषां ज्ञानमावश्यकम्। साक्षात् श्रुतिरेव वेदाम्नायाद्यनेकैः पदैः शास्त्रादिषु व्यवह्रीयते। श्रुतीनान्तु प्रमाणान्तरनिरपेक्षतया स्वातन्त्र्येण साक्षात् प्रामाण्यमिति पूर्वमीमांसाशास्त्रे प्रथमाध्यायस्य प्रथमपादे धर्मप्रामाण्यनिरूपणावसरे चोदनाप्रामाण्याधिकरणद्वारा साधितं दृश्यते।

तत्र भगवता जैमिनिना प्रथमाध्यायस्य प्रथमपादे विधिवाक्यानां स्वतःप्रामाण्यं साधितम्। द्वितीयपादे वेदवाक्यानां मन्त्रार्थवादानां धर्मप्रामाण्यं प्रदर्शितम्। तृतीये पादे स्मृतिशिष्टाचाराणां धर्मप्रामाण्यं प्रातिपाद्यते इति कृत्वा उपजीव्योपजीवकभाव संगतिः ज्ञायते। यथा विधिः स्मृतेर्मूलं, तथा एव मन्त्रार्थवादावपि क्वचित् मूलत्वेन अवलोक्येते। अतः तौ मन्त्रार्थवादौ उपजीव्यौ। तौ उपजीव्य स्मृतीनां प्रामाण्यं निरूप्यत इति स्मृतयः उपजीविकाः। अत्र स्मृतीनां प्रामाण्य निरूपणमिति स्मृतिपदं सदाचाराणामपि उपलक्षणम्। तथा च स्मृतिपदेन वेदातिरिक्तः सर्वोपि पुराणन्यायधर्मशास्त्रादयः ग्राह्याः।

लोके श्रौतस्मार्तभेदेन वेदप्रतिपादितधर्माचरणे द्वैविध्यं दृश्यते। तत्र साक्षात् श्रुतिबोधितानि कर्माणि अग्निहोत्रादीनि। एवं मन्वादिस्मृतिबोधितानि कर्माणि अष्टकादीनि। तत्र श्रुत्युक्तधर्माचरणविषये न कस्यापि संदेहः। किन्तु मन्वादिप्रणीतानां स्मृतिग्रन्थानां धर्मप्रमाजनकत्वविषये एव प्रामाण्याप्रामाण्यादि चिन्ता प्रवर्तते। तेषां मन्वादिप्रणीतानां स्मृतीनां प्रामाण्यविषये श्रुतीनामिव साक्षात् प्रामाण्यं वा उत श्रुतिमूलकत्वेन प्रामाण्यं वा इत्यदि कश्चनविचारः अपेक्षते। स्मृत्युक्तधर्माचरणे प्रवृत्तिसिध्यर्थं तासां स्मृतीनामादौ प्रामाण्यं वक्तव्यम्। अत एव प्रथमाध्यस्य तृतीयपादे स्मृतिप्रामाण्याधिकरणमारब्धं भगवता जैमिनिना। इदानीं स्मृतिप्रामाण्यविचारस्य किञ्चित् परिशीलनमत्र क्रियते।

''अष्टकाः कर्तव्याः, गुरुरनुगन्तव्यः, तडागं खनितव्यम्, प्रपा प्रवर्तयितव्या, शिखाकर्मकर्तव्यम्'' [8] इत्येवमादीनि स्मृतिवाक्यानि अत्र विषयवाक्यत्वेनोदाह्रियन्ते।

वेदातिरिक्तानां मन्वादिस्मृतीनां धर्मे प्रामाण्यम् अस्ति वा नवेति संशयः।

तत्र स्मतिप्रामाण्याधिकरणस्य पूर्वपक्षे ''धर्मस्यशब्दमूलत्वात् अशब्दमनपेक्षं स्यात्'' [9] इतीदं सूत्रमाश्रित्य पूर्वपक्षिणः स्मृतिवाक्यानाम् अप्रामाण्यं निरूपयन्ति। स्मृतिवाक्यानां मूलप्रमाणासम्भवात् अप्रामाण्यमेव इति। यथैव पारम्पर्येण अविच्छिन्नभूतः अयं वेदः प्रमाणं तथैव इयं स्मृतिः अपि धर्मे प्रमाणम् इति चेत्, न एतद्युक्तम्। उभयोः श्रुतिस्मृत्योः प्रामाण्याङ्गीकारे भेदः अस्त्येव। वेदविषये अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यनेन स्वर्गादिसाध्यसाधनभावः यथा प्रत्यक्षेण उपलभ्यते तथा अष्टकादिविषये नास्ति। कुत इति चेत्, पूर्वविज्ञानाभावात्। उक्तं च तन्त्रवार्तिके –

पूर्वविज्ञानविषयं विज्ञानं स्मृतिरुच्यते।
पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नावधार्यते।।[10] इति

तथा च स्मृतयस्तावत् दृढकर्तृस्मरणेन पौरुषेयाः। अतः पुरुषसंसर्गदोषवशात् भ्रमप्रमादादयः जायेरन्नेव। धर्मस्य शब्दैकगम्यत्वात् अर्थात् वेदैकगम्यत्वात् स्मुतीनां वेदान्तर्भावाभावात् न साक्षात् प्रामाण्यम्। स्मृतिनां प्रामाण्यं यदि स्वीकर्तव्यं तर्हि तासां प्रमाणमूलकत्वं वक्तव्यम्। अत एव ''धर्मस्य शब्दमूलत्वात् अशब्दं अनपेक्षं स्यात्'' इति सूत्रं स्मृतीनां वेदमूलकत्वेन प्रामाण्यं निवारयितुं उपक्रमते। वेदमूलकत्वाभावात् धर्मप्रमाजनकत्वं स्मृतीनां नास्तीति धर्माधर्मयोः प्रामाण्यासम्भवः। अतः अष्टकादिस्मृतीनां श्रुतिमूलासम्भवात्, भ्रान्तिमूलकत्वाच्च

अप्रामाण्यमेव इति प्राप्ते।

मन्वादिभिः शिष्टैः प्रणीतानां स्मृतीनां धर्मप्रमाजनकत्वेन प्रामाण्यमस्तीति ''अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्''[11] इति सिद्धान्तसूत्रेण साधितं शास्त्रे। तच्च प्रामाण्यं न साक्षात् श्रुतित्वेन अपि तु श्रुतिमूलकत्वेनेति शास्त्रसिद्दान्तः। सूत्रस्थ अपिवा इति शब्दः पूर्वपक्षव्यावर्तकशब्दः। वेद प्रामाण्याभ्युपगन्तारः शिष्टत्रैवर्णिकाः वेदोक्तकर्मानुष्ठातारश्च ये सन्ति ते एव स्मृतिविहितान्यपि कर्माण्यपि अनुतिष्ठन्ति। धर्मबुध्या एव अष्टकाः कर्तव्याः इत्यदि स्मृत्युक्तानि कर्माणि अग्निहोत्रादिवत् अनुष्ठीयन्ते। अर्थात् वेदोक्तकर्मसु यथा परिग्रहः शिष्टत्रैवर्णिकानां मन्वादिनां वर्तते तथैव स्मृत्युक्तेषु कर्मस्वपि। तस्मात् अनुमीयते यत् स्मृतयः धर्मबोधकप्रमाणमूलिकाः इति। अष्टकाः कर्तव्याः इत्यादिवाक्यं प्रामाणं शिष्टत्रैवर्णिकैः अनुष्ठितत्वात् ज्योतिष्टोमादिवत्।

**अष्टकाः कर्तव्याः** इत्यस्य लिङ्गदर्शनम् उपलभ्यते। तन्मन्त्रलिङ्गं भाष्यकृता उदाहृतम्। यथा –

यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम्।
संवथ्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा ।।[12] इति

अष्टकायै सुराधसे स्वाहा इति च अष्टकाः कर्तव्याः इत्यस्याः स्मृतेः मूलम्।

एवञ्च तस्मात् श्रेयांसं पूर्वं यन्तं पापीयान्पश्चादन्वेति [13] इति श्रुतिः गुरुरनुगन्तव्यः इत्यस्याः स्मृतेः मूलम्। गुरुणा साकम् अनुगमने गुरोः प्रीतिं सम्पाद्य अध्ययनं सम्यक् भविष्यति इति अस्यार्थः।

''धन्वन्निवप्रपा असि'' [14] इतीयं श्रुतिः प्रपा प्रवर्तयितव्या इत्यस्याः स्मृतेः मूलम्।

एवञ्च ''यत्र बाणाः संपतन्ति कुमारा विशिखा इव'' [15] इति श्रुतिवचनं शिखाकर्मकर्तव्यम् इत्यस्याः स्मृतेः मूलम्।

एवञ्च सर्वेषां स्मृतिवाक्यानां मूलं तु श्रुतिरेवेति ज्ञेया। यदि कदाचित् प्रत्यक्षश्रुतिः नोपलभ्यते कथं श्रुतिमूलकत्वं स्मृतीनाम् इति जिज्ञासा प्रवर्तत्ते चेत् अथवा मन्वादीनां यदि वेददर्शनं सम्भवति तर्हि इदानीं तत् कुतो न इति संदिह्यते चेदपि तत्र परिहारत्वेन इदं प्रपञ्चितम्। यथा –

शाखानां विप्रकीर्णत्वात् पुरुषाणां प्रमादतः।
नाना प्रकरणस्थत्वात् स्मृतेः मूलं न दृश्यते।। [16] इति

तत्र पूर्वोक्तवत् स्वाध्यायविधौ स्वाध्यायपदेन स्वकुलगुरुपरम्परया प्राप्तायाः एकस्या एव शाखायाः अध्ययनं नियम्यते। अतः मन्वादिभिः प्रत्यक्षपठिताः अपि वेदभागाः अध्येतृलोपात् इदानीम् अस्माभिः नोपलभ्यन्ते। कुत्रचित् शाखान्तरोक्ताः अर्थाः अपि अनुष्ठेयाः भवन्ति। अनुष्ठानवेलायां स्वशाखाधीताः स्वशाखोक्तप्रयोगानुष्ठाने एव समर्थो भवति। स्वशाखायामविद्यमानः अनुष्ठेयांशः शाखान्तरे अस्ति चेत् ततो ग्राह्यः एव सः। मन्वादिभिस्तु स च विषयं ज्ञात्वा निर्णीतो वर्तते इति स्मृतिप्रणयनसार्थक्यं सिध्यत्येव। स्मृतिप्रणेतारः प्रयोगानुष्ठानसिध्यर्थं नानावेदेषु विप्रकीर्णतया विद्यमानस्य अनुष्ठेयार्थस्य एकत्र संगृह्य स्मृतीः प्रणिन्युः इत्यतः स्मृतीनां प्रामाण्यमभ्युपगतम्।

स्मृतीनान्तु यद्यपि न साक्षात् प्रामाण्यम्, तथापि प्रमाणभूतपरोक्षवेदानुमानद्वारा परम्परया प्रामाण्यं युक्तमेव। यतो हि सर्वतन्त्रस्वतन्त्रैः निखिलविद्यास्थानाधीतवेदविद्वन्महर्षिभिः वेदपरिपालकैः धर्ममार्गप्रतिष्ठापनार्थमेव तत्प्रणीतत्वात्, शिष्टैस्तत्परिगृहीतत्वाच्च तेषां मूलप्रमाणसापेक्षत्वम्। मन्वादिस्मृतयोऽपि प्रत्यक्षवेदवाक्यान्तराविरुध्दा एव प्रमाणम्, वेदविरुध्दे तु "विरोधे त्वनपेक्षंस्यादसति ह्यनुमाम्" [17] इति सूत्रानुसारं तेषामप्रामाण्यमेव।

न च शाक्यादिस्मृतीनां प्रत्यक्षवेदवाक्यान्तराविरुध्दत्वेपि वेदमूलकत्वेन प्रामाण्यं वक्तुं शक्यते। यतो हि शाक्यादिस्मृतिग्रन्थेषु धर्मत्वेन प्रतिपादितानां सत्याहिंसादि तत्वानां वेदविद्वेषिभिरेवप्रणीतत्वात् तैरेव परिगृहीतत्वात्

वेदमूलत्वासम्भवात् अवैदिकत्वाच्च अप्रामाण्यमेवावतिष्ठते। "नावेद विहितं कर्म फलतीति" वचनेन सत्याहिंसादिकं हि वेदवाक्याज्ज्ञायमानमेवाऽनुष्ठीयमानं फलाय कल्पते। वैदिकविद्यादिज्ञानं विना सम्पादितप्रवृत्तिर्न वेदोक्तफलसाधनाय पर्याप्ता भवति। तथा वैदिकलिङ्गादिजनितप्रवर्तनाज्ञानं विना प्रवृत्तिरपि न फलमुत्पादयतीति शाक्यादिस्मृत्यनुसारेणानुष्ठीयमानमहिंसादिकं न दृष्टं पारलौकिकं वा फलं सम्पादयति। यथा स्वभावतः सर्वादरणीयं पयः श्वचर्ममये पात्रे निक्षिप्तं सर्वथाऽशुध्दं तत्सर्वेषामनादरणीयं तद्वत् वैदिकधर्माधर्मादिरूपसत्याहिंसादीनाम् अवैदिकशाक्यसम्बन्धादेव अप्रामाण्यम्, गोक्षीरन्यायानुसारं त्याज्यञ्च। तदर्थमेवोक्तं भाट्टपादेन तन्त्रवार्तिके –

"असाधुशब्दभूयिष्ठाः शाक्यजैनागमनादयः।
असन्निबन्धत्वाच्च शास्त्रत्वं न प्रतीयते"।।
"ततश्चासत्यशब्देषु कुतस्तेष्वर्थसत्यता।
दृष्टापभ्रष्टरूपेषु कथं वा स्यादनादिता"।।
"वेदे यतोपलभ्यन्ते नैवं शक्यादिभाषिते।
प्रयोगनियमाभावादतोऽप्यस्य न सास्त्रता"।।[18] इत्यादिना

तदुक्तञ्च मानुना

"याः वेद बाह्याः स्मृतयो याश्च काश्च कुदृष्टयः।
सर्वास्ता निष्फलाः प्रेत्य तमो निष्ठा हि ताः स्मृताः"।। [19]
इति

अतस्सिद्धं मन्वादिस्मृतीनां वेदमूलकत्वेन धर्मे प्रमाण्यम्।

## सन्दर्भसूची

1. जै.सू – 1.1.1
2. जै.सू – 1.1.2
3. अ.सं, पृ.सं - 30
4. म.स्मृ - 2.6
5. तै.ब्रा – 3.10.11
6. स्मृतिचन्द्रिका, संस्कारकाण्ड – पृ.सं - 3
7. या.स्मृ – आचाराध्यायः - 3
8. शा.भा – 1.3.1
9. जै.सू – 1.3.1
10. त.वा, पृ.सं - 160
11. जै.सू – 1.3.2
12. ए.का – 2-20
13. शा.भा – 1.3.1
14. तै.सं – 2.5.12
15. तै.सं – 4.6.4
16. त.वा, पृ.सं - 164
17. जै.सू – 1.3.3
18. त.वा – 1.3.1
19. म.स्मृ – 12.94

## आधारग्रन्थाः


1. मीमांसाशाबरभाष्यम् -युधिष्ठिरमीमांसकः, रामलालकपूर् ट्रष्ट्, हरियाणा – 1990 (आर्षमतविमर्शिन्या हिन्दीव्याख्यया सहितम्)
2. भाट्टदीपका (प्रभावलीव्याख्यासहितः) खण्डदेवाचार्यः, सद्गुरु पब्लिकेशन्स्, नवदेहली
3. जैमिनिसूत्रवृत्तिः (सुबोधिनी)- रामेश्वरसूरी, चौखम्बा संस्कृतप्रतिष्ठान, देहली
4. शास्त्रदीपिका (युक्तिस्नेहपूरणीव्याख्यासहिता) पार्थसारथिमिश्रः, चौखम्बाकृष्णदास अकाडेमी, वारणासी, 2003
5. तैत्तिरीयसंहिता - चौखम्बापब्लिकेषन्स्, वारणासी – 1978
6. तैत्तिरीयब्राह्मणम् - चौखम्बापब्लिकेषन्स्, वारणासी – 1990
7. तन्त्रवार्तिकम् - विनायकगणेश आपटे, आनन्दाश्रमसंस्कृतग्रन्थावळिः, पूणे 1929